# ॥ श्रीमहागणपतिमूलमन्त्रपदमालास्तोत्रम् ॥

..
shrImahAgaNapatimUlamantrapadamAlAstotram
..

sanskritdocuments.org

August 20, 2017

# .. shrImahAgaNapatimUlamantrapadamAlAstotram ..

# ॥ श्रीमहागणपतिमूलमन्त्रपदमालास्तोत्रम् ॥

## Sanskrit Document Information

Text title : mahAgaNapatimUlamantrapadamAlAstotram

File name : mahAgaNapatimUlamantrapadamAlAstotram.itx

Category : mAlAmantra, ganesha

Location : doc_ganesha

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Latest update : June 16, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीमहागणपतिमूलमन्त्रपदमालास्तोत्रम् ॥

॥ मूलमन्त्रम्॥

॥ ॐ ह्रीं श्रीं क्लीं ग्लौं गं गणपतये वरवरद
सर्वजनं मे वशमानय स्वाहा ॥

The following stotram is a very powerful Hymn to Lord Ganesha in which the first letters/word of each verse corresponds to the letter/word of the Moolamantram. This Stotram is composed by Shri C
V Swami Shastri AKA Shri Anantaananda Naatha, who devotes it to His
GuruDeva Shri Chidaananda Naatha. He has announced that the merits
of reading and chanting this Stotram are equivalent to chanting the Moolamantram.

॥ अथ स्तोत्रम्॥

ॐइत्येतदजस्य कण्ठविवरं भित्वा बहिर्निर्गतं
ह्योमित्येव समस्तकर्म ऋषिभिः प्रारभ्यते मानुषैः ।
ओमित्येव सदा जपन्ति यतयः स्वातमैकनिष्ठाः परं
ह्योङ्काराकृतिवक्रमिन्दुनिटिलं विघ्नेश्वरं भवाये ॥ १॥

श्रीम्बीजं श्रमदुःखजन्ममरणव्याध्याधिभीनाशकं
मृत्युक्रोधनशान्तिबिन्दुविलसद्वर्णाकृतिश्रीप्रदम् ।
स्वान्तःस्वात्मशरस्य लक्ष्यमजरस्वात्मावबोधप्रदं
श्रीश्रीनायकसेविते भवदनप्रेमास्पदं भावये ॥ २॥

ह्रीम्बीजं हृदयत्रिकोणविलसन्मध्यासनस्थं सदा
चाकाशानलवामलोचननिशानाथार्धवर्णात्मकम् ।
मायाकार्यजगत्प्रकाशकमुमारूपं स्वशक्तिप्रदं
मायातीतपदप्रदं हृदि भजे लोकेश्वराराधितम् ॥ ३॥

क्लीम्बीजं कलिधातुवत्कलयतां सर्वेष्टदं देहिनां

धातृक्ष्मायुतशान्तिबिन्दुविलसद्वर्णात्मकं कामदम् ।
श्रीकृष्णप्रियमिन्दिरासुतमनःप्रीत्येकहेतुं परं
हृत्पद्मे कलये सदा कलिहरं कालारिपुत्रप्रियम् ॥ ४॥

ग्लौम्बीजं गुणरूपनिर्गुणपरब्रह्मादिशक्तेर्महा-
हङ्काराकृतिदण्डिनीप्रियमजश्रीनाथरुद्रेष्टदम् ।
सर्वाकर्षिणिदेवराजभुवनार्णेन्द्वात्मकं श्रीकरं
चित्ते विघ्ननिवारणाय गिरिजजातप्रियं भावये ॥ ५॥

गङ्गासुतं गन्धमुखोपचारप्रियं खगारोहणभागिनेयम् ।
गङ्गासुताद्यं वरगन्धतत्त्वमूलाम्बुजस्थं हृदि भावयेऽहम् ॥ ६॥

गणपतये वरगुणनिधये सुरगणपतये नतजनततये ।
मणिगणभूषितचरणयुगाश्रितमलहरणे चण ते नमः ॥ ७॥

वराभये मोदकमेकदन्तं कराम्बुजातैः सततं धरन्तम् ।
वराङ्गचन्द्रं परभक्तिसान्द्रैर्जनैर्भजन्तं कलये सदाऽन्तः ॥ ८॥

वरद नतजनानां सन्ततं वक्रतुण्ड
स्वरमयनिजगात्र स्वात्मबोधैकहेतो ।
करलसदमृताम्भोपूर्णपत्राद्य मह्यं
गरगलसुत शीघ्रं देहि मद्बोधमीड्यम् ॥ ९॥

सर्वजनं परिपालय शर्वज
पर्वसुधाकरगर्वहर ।
पर्वतनाथसुतासुत पालय
खर्वं मा कुरु दीनमिमम् ॥ १० ॥

मेदोऽस्थिमांसरुधिरान्त्रमये शरीरे
मेदिन्यबग्निमरुदम्बरलास्यमाने ।
मे दारुणं मदमुखाघमुमाज हत्वा
मेधाह्वयासनवरे वस दन्तिवक्त्र ॥ ११॥

वशं कुरु त्वं शिवजात मां ते वशीकृताशेषसमस्तलोक ।
वसार्णसंशोभितमूलपद्मलसच्छ्रियाऽलिङ्गवारणास्य ॥ १२॥

आनयाशुपदवारिजान्तिकं मां नयादिगुणवर्जितं तव ।

हानिहीनपदजामृतस्य ते पानयोग्यमिभवक्त्र मां कुरु ॥ १३॥

स्वाहास्वरूपेण विराजसे त्वं सुधाशनानां प्रियकर्मणीड्यम् ।
स्वधास्वरूपेण तु पित्र्यकर्मण्युमासुतेज्यामयविश्वमूर्ते ॥ १४॥

अष्टाविंशतिवर्णपत्रलसितं हारं गणेशप्रियं
कष्टाऽनिष्टहरं चतुर्दशपदैः पुष्पैर्मनोहारकम् ।
तुष्ट्यादिप्रदसद्गुरुत्तमपदाम्भोजे चिदानन्ददं
शिष्टेष्टोऽहमनन्तसूत्रहृदयाऽऽबद्धं सुभक्त्याऽर्पये ॥ १५॥

॥ इति श्रीअनन्तानन्दकृतं श्रीगुरुचिदानन्दनाथसमर्पितं
श्रीमहागणपतिमूलमन्त्रमालास्तोत्रम् ॥

Notes
निटिलं = मस्तक, भीनाशकं = भयनाशक, क्ष्मा = पृथ्वी,
गिरिजाजात = गिरिजा स्वारा उत्पन्न, उद्भूत,
नतजनततये = भक्तों के रक्षक,
मलहरणेचण = पापों को नष्ट जरने हेतु प्रसिद्ध
गरगलसूत = विष को निगलनेवाले भगवान् शङ्कर के पुत्र
देहि मद्बोधमीड्यम् = मुझे प्रशंसनीय ज्ञान प्रदान करें
शर्वज = शिवपुत्र, पर्वतनाथसुतासुत = हिमाल की पुत्री पार्वती के पुत्र
from shrImahAgaNapatisAdhanA

Encoded and proofread by anonymous456an at gmail.com

.. shrImahAgaNapatimUlamantrapadamAlAstotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*